Shri SantoshimatuH AshtottarashatanamavaliH 3 108 Names

# श्रीसन्तोषीमातुरष्टोत्तरशतनामावलिः ३

## Document Information

Text title : Shri Santoshimata Ashtottarashata Namavali 3 108 Names

File name : santoShImAturaShTottarashatanAmAvaliH3.itx

Category : devii, aShTottarashatanAmAvalI, otherforms

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com

Proofread by : Sivakumar Thyagarajan Iyer, PSA EASWARAN psaeaswaran at gmail.com

Latest update : January 18, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 18, 2020

*sanskritdocuments.org*

# श्रीसन्तोषीमातुरष्टोत्तरशतनामावलिः ३

ॐ श्रीदेव्यै नमः । श्रीपदाराध्यायै । शिवमङ्गलरूपिण्यै ।
श्रीकर्यै । शिवाराध्यायै । शिवज्ञानप्रदायिन्यै । आदिलक्ष्म्यै ।
महालक्ष्म्यै । भृगुवासरपूजितायै । मधुराहारसन्तुष्टायै ।
मालाहस्तायै । सुवेषिणे । कमलायै । कमलान्तस्थायै । कामरूपायै ।
कुलेश्वर्यै । तरुण्यै । तापसाऽऽराध्यायै । तरुणार्कनिभाननायै ।
तलोदर्यै नमः । २०

ॐ तटिद्देहायै नमः । तप्तकाञ्चनसन्निभायै । नलिनीदलहस्तायै ।
नयरूपायै । नरप्रियायै । नरनारायणप्रीतायै । नन्दिन्यै ।
नटनप्रियायै । नाट्यप्रियायै । नाट्यरूपायै । नामपारायणप्रियायै ।
परमायै । परमाह्लाददायिन्यै । परमेश्वर्यै । प्राणरूपायै ।
प्राणदात्र्यै । पाराशर्यादिवन्दितायै । महादेव्यै । महापूज्यायै ।
महाभक्तसुपूजितायै नमः । ४०

ॐ महामहादिसंपूज्यायै नमः । महाप्राभवशालिन्यै । महितायै ।
महिमान्तस्थायै । महासाम्राज्यदायिन्यै । महामायायै । महासत्वायै ।
महापातकनाशिन्यै । राजप्रियायै । राजपूज्यायै । रमणायै ।
रमणलम्पटायै । लोकप्रियङ्कर्यै । लोलायै । लक्ष्मिवाणीसंपूजितायै ।
ललितायै । लाभदायै । लकारार्धायै । लसत्प्रियायै । वरदायै नमः । ६०

ॐ वररूपाराध्यायै नमः । वर्षिण्यै । वर्षरूपिण्यै । आनन्दरूपिण्यै
देव्यै । सन्ततानन्ददायिन्यै । सर्वक्षेमकर्यै । शुभायै ।
सन्ततप्रियवादिन्यै । सन्ततानन्दप्रदात्र्यै । सच्चिदानन्दविग्रहायै ।
सर्वभक्तमनोहर्यै । सर्वकामफलप्रदायै । भुक्तिमुक्तिप्रदायै ।
साध्व्यै । अष्टलक्ष्म्यै । शुभङ्कर्यै । गुरुप्रियायै । गुणानन्दायै ।
गायत्र्यै । गुणतोषिण्यै नमः । ८०

ॐ गुडान्नप्रीतिसन्तुष्टायै नमः । मधुराहारभक्षिण्यै । चन्द्राननायै ।

चित्स्वरूपायै । चेतनायै । चारुहासिन्यै । हरस्वरूपायै ।
हरिण्यै । हाटकाभरणोज्ज्वलायै । हरिप्रियायै । हराराध्यायै ।
हर्षिण्यै । हरितोषिण्यै । हरिदासमाराध्यायै । हारनीहारशोभितायै ।
समस्तजनसन्तुष्टायै । सर्वोपद्रवनाशिन्यै । समस्तजगदाधारायै ।
सर्वलोकैकवन्दितायै । सुधापात्रसुसम्युक्तायै नमः । १००

ॐ सर्वानर्थनिवारण्यै नमः । सत्यरूपायै । सत्यरतायै ।
सत्यपालनतत्परायै । सर्वाभरणभूषाढ्यायै । सन्तोषिन्यै ।
श्रीपरदेवतायै । सन्तोषीमहादेव्यै नमः । १०८

इति श्रीसन्तोषीमातुरष्टोत्तरशतनामावलिः समाप्ता ।

Encoded by Sivakumar Thyagarajan Iyer shivakumar24 at gmail.com
Proofread by Sivakumar Thyagarajan Iyer, PSA Easwaran

*Shri SantoshimatuH AshtottarashatanamavaliH 3 108 Names*
pdf was typeset on January 18, 2020

Please send corrections to *sanskrit@cheerful.com*